श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीकोमलवल्लीसुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीकोमलवल्लीसुप्रभातम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

हेमापगातटविभूषणकुम्भघोणे
हेमाभिधानमुनिनाथतपः प्रभावात्।
हेमाब्जिनीकनकपङ्कजमध्यजाते!
हे! मातराश्रितहिते! तव सुप्रभातम्॥ १॥

नाथो नतौघनयनामृततां गतोऽयम्
आदौ त्वदीयमुखपद्मविलोकनाय।
बद्धादरः फणिपतौ ननु मीलिताक्षः
श्रीशार्ङ्गपाणिदयिते! तव सुप्रभातम्॥ २॥

माता तवाम्ब! शुभशीतलमन्दवातैः
आश्लिष्टशीकरकणाकृतिरादरेण।
द्वारान्तिकं किल कवेरसुता प्रपन्ना
श्रीशार्ङ्गपाणिदयिते! तव सुप्रभातम्॥ ३॥

श्रीकुम्भघोणनगरीं तव मातरेनां
त्वन्मातुरेव सरसामृतसंवृताङ्गीम्।
सा ब्रह्मपुरियमिहेति परं विदन्ति
श्रीशार्ङ्गपाणिदयिते! तव सुप्रभातम्॥ ४॥

श्रीकुम्भघोणनगरीममृतं वहन्तीं
त्वद्वीक्षयातिमधुरं विबुधाः परीताः।
भोक्तुं समाहितधियश्शुचयो वसन्ति
श्रीशार्ङ्गपाणिदयिते! तव सुप्रभातम्॥ ५॥

www.prapatti.com

पुष्पाणि नैकविधवर्णमनोहराणि
त्वत्पादपङ्कजसमागमलोलुपानि।
आदाय भक्तनिवहास्समुपागतास्ते
श्रीशार्ङ्गपाणिदयिते! तव सुप्रभातम्॥ ६॥

श्रीकोमलाम्ब! कनकाम्बुजजातमूर्ते!
श्रीकुम्भघोणनगरीतिलकायमाने!।
श्रीहेमयोगिवरपुण्यकृतावतारे!
श्रीशार्ङ्गपाणिदयिते! तव सुप्रभातम्॥ ७॥

मातर्मधोरपि रिपोर्मधुरे! नितान्तं
मान्ये! मनोहरमुखाम्बुजसेवनीये!।
मारारिमौलिधृतपादसरोजयुग्मे!
मानातिलङ्घिविभवे! तव सुप्रभातम्॥ ८॥

प्राग्द्वारतश्च भगवानथ पश्चिमाच्च
द्वारान्निजेन नयनेन दिवाकरेण।
आलोकते तव वपू रजनीकरेण
श्रीशार्ङ्गपाणिदयिते! तव सुप्रभातम्॥ ९॥

श्रीहर्षकृत् स्यामिति नाथक्लृप्त-
श्रीपुष्पवर्षेण विराजमाने!।
सामर्षभृङ्गाकुलकेशपाशे!
हेमर्षिकन्ये! तव सुप्रभातम्॥ १०॥

सुधानिधिसमुत्थिते! सुमसमूहसंमण्डिते!
सुधाकरसहोदिते! सुमशरस्य माता रमे!॥
सुधाभिधसहस्थिते! सुतनुसङ्गरत्नायिते!
सुरासुरनमस्कृते! सुखपदं कुरुष्वानतम्॥ ११॥

कोमलं कोमलाम्बायाः
सुप्रभातं प्रभान्वितम्।

पठन्तः श्रीनिधेर्जातं
भवन्ति श्रीदृशां पदम्॥ १२॥

॥ इति श्रीकोमलवल्लीसुप्रभातं समाप्तम्॥

www.prapatti.com